। प्रा॒ण उ॒परि॑ष्टात् । प्रा॒ण इति॑ प्र-अ॒नः । उ॒परि॑ष्टादपा॒नः । अ॒पा॒नो यावान्॑ । अ॒पा॒न इत्य॑प-अ॒नः । याव॑ा॒नेव । ए॒व प॒शुः । प॒शुस्तस्य॑ । तस्याव॑ । अव॑ द्यति । द्य॒ति॒ विष्ण॑वे । विष्ण॑वे शिपिवि॒ष्टाय॑ । शि॒पि॒वि॒ष्टाय॑ जुहोति । शि॒पि॒वि॒ष्टाये॑ति॑ शिपि- वि॒ष्टाय॑ । जु॒हो॒ति॒ यत् । यद्वै । वै य॒ज्ञस्य॑ । य॒ज्ञस्या॑ति॒रिच्य॑ते । अ॒ति॒रिच्य॑ते॒ यः । अ॒ति॒रिच्य॑त॒ इत्य॑ति-रिच्य॑ते । यः प॒शोः । प॒शोर्भूमा । भूमा या । या पुष्टिः॑ । पु॒ष्टि॒स्तत् । तद्विष्णुः॑ । विष्णु॑श्शिपिवि॒ष्टः । शि॒पि॒वि॒ष्टो॑ति॑रिक्ते । शि॒पि॒वि॒ष्ट इति॑ शिपि-वि॒ष्टः । अति॑रिक्त ए॒व । अति॑रिक्त॒ इत्यति॑-रि॒क्ते॒ । ए॒वाति॑रिक्तं । अति॑रिक्तं दधाति । अति॑रिक्त॒मित्यति॑-रि॒क्त॒म् । दधा॒त्यति॑रिक्तस्य । अति॑रिक्तस्य शान्त्यै॑ । अति॑रिक्त॒स्येत्यति॑-रि॒क्त॒स्य॒ । शान्त्या॑ अ॒ष्टाप्॑रूट् । अ॒ष्टाप्॑रूड्ढिर॑ण्यं । अ॒ष्टाप्॑रू॒डित्य॒ष्टा-प्रू॒ट् । हिर॑ण्यं दक्षि॑णा । दक्षि॑णाऽष्टाप॑दी । अ॒ष्टाप॑दी हि । अ॒ष्टाप॒दीत्य॒ष्टा-प॒दी॒ । ह्ये॑षा । ए॒षाऽऽत्मा । आ॒त्मा न॑व॒मः । न॒व॒मः प॒शोः । प॒शोरात्मै॑ । आत्मा॑ अन्तरकोशे । अ॒न्त॒र॒कोश उ॒ष्णीषे॑ण । अ॒न्त॒र॒कोश इत्य॑न्तर-कोशे । उ॒ष्णीषे॒णावि॑ष्टितं । आवि॑ष्टितं भवति । आवि॑ष्टि॒तमित्या-वि॒ष्टि॒तम्॒ । भ॒व॒त्येव॑ं । एव॑मि॑व । इ॒व॒ हि । हि प॒शुः । प॒शुरु॒ल्मु॑ । उ॒ल्मि॑व । इ॒व॒ चर्म॑ । चर्मे॑व । इ॒व॒ मा॒ꣳसं । मा॒ꣳसमि॑व । इ॒वास्थि॑ । अ॒स्थी॑व । इ॒व॒ यावान्॑ । याव॑ा॒नेव । ए॒व प॒शुः । प॒शुस्तं । तमा॒त्वा । आ॒त्वाऽव॑ । अव॑ रुन्धे । रु॒न्धे॒ यस्य॑ । यस्ये॒षा । ए॒षा य॒ज्ञे । य॒ज्ञे प्रा॑यश्चि॒त्तिः । प्रा॒यश्चि॒त्तिः क्रि॒यते॑ । क्रि॒यत॑ इ॒ष्ट्वा । इ॒ष्ट्वा वसी॑यान् । वसी॑यान्भवति । भ॒व॒तीति॑ भवति () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

आ वा॑यो । वा॒यो॒ भू॒ष॒ । वा॒यो॒ इति॑ वायो । भू॒ष॒ शु॒चि॒पाः॒ । शु॒चि॒पा उप॑ । शु॒चि॒पा इति॑ शुचि-पाः॒ । उप॑ नः । नः॒ स॒हस्र॑म् । स॒हस्र॑ ते । ते॒ नि॒युतः॑ । नि॒युतो॑ विश्ववार । नि॒युत॒ इति॑ नि-युतः॑ । वि॒श्व॒वा॒रेति॑ विश्व-वा॒र॒ ॥ उपो॑ ते । उपो॒ इत्युपो॑ । ते॒ अन्धः॑ । अन्धो॒ मद॑म् । मद॑मयामि । अ॒या॒मि॒ यस्य॑ । यस्य॑ देव । दे॒व॒ दधिषे । दधिषे पू॒र्वपेय॑म् । पू॒र्वपेय॒मिति॑ पूर्व-पेय॑म् ॥ आकू॑त्यै ब्रा । आकू॑त्या इत्या-कू॒त्यै॒ । ब्रा॒ कामा॑य । कामा॑य ब्रा । ब्रा॒ स॒मृधे॑ । स॒मृधे॑ ब्रा । स॒मृध॒ इति॑ सं-ऋधे॑ । ब्रा॒ किक्किटा । किक्किटा तै॑ । ते॒ मनः॑ । मनः॑ प्र॒जाप॑तये । प्र॒जाप॑तये स्वाहा॑ । प्र॒जाप॑तय॒ इति॑ प्र॒जा- प॒त॒ये॒ । स्वाहा॑ किक्किटा । किक्किटा तै॑ । ते॒ प्राण॑म् । प्राण॑म् वायवै॑ । प्राण॒मिति॑ प्र-अ॒न॒म् । वा॒यवे॒ स्वाहा॑ । स्वाहा॑ किक्किटा । किक्किटा तै॑ । ते॒ चक्षुः॑ । चक्षु॒स्सूर्या॑य । सूर्या॑य स्वाहा॑ । स्वाहा॑ किक्किटा । किक्किटा तै॑ । ते॒ श्रोत्र॑म् । श्रोत्र॑म् द्यावा॑पृथि॒वीभ्या॑म् । द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहा॑ । द्यावा॑पृथि॒वीभ्या॒मिति॒ द्यावा॑-पृथि॒वीभ्या॑म् । स्वाहा॑ किक्किटा । किक्किटा तै॑ । ते॒ वाच॑म् । वाच॒ꣳ सर॑स्वत्यै । सर॑स्वत्यै स्वाहा॑ । स्वाहा॒ ब्रा ()

काण्ड -3, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। ब्रा तु॒रीया॑म् । तु॒रीया॑ वशि॒नी॑म् । व॒शि॒नी॑ व॒शा । व॒शा ऽः॑सि । अ॒सि॒ स॒कृत् । स॒कृद्य॑त् । य ब्रा॑म् । ब्रा॒ मन॑सा । मन॑सा॒ गर्भः॑ । गर्भ॒ आ । आऽश॑यत् । अश॑य॒दित्यश॑यत् ॥ व॒शा ब्रा । ब्रा व॒शि॒नी॑म् । व॒शि॒नी॑ गच्छ । ग॒च्छ॒ दे॒वान् । दे॒वान्त्स॒त्याः । स॒त्यास्स॑न्तु । स॒न्तु॒ यज॑मानस्य । यज॑मानस्य॒ कामा॑ः । कामा॒ इति॒ कामा॑ः ॥ अ॒जाऽसि॑ । अ॒सि॒ रयि॒ष्ठा । र॒यि॒ष्ठा पृ॑थि॒व्याम् । र॒यि॒ष्ठेति॑ रयि-स्था । पृ॒थि॒व्याꣳ सी॑द । सी॒दो॒र्ध्वा । ऊ॒र्ध्वान्त॑रिक्षम् । अ॒न्त॑रिक्षमुप॑ । उप॑ तिष्ठस्व । ति॒ष्ठ॒स्व॒ दि॒वि । दि॒वि तै॑ । ते॒ बृ॒हत् । बृ॒हद्भाः । भा इति॒ भाः ॥ तन्तु॑म् त॒न्वन् । त॒न्वन्र॑ज॑सः । र॒ज॑सो भा॒नु॒म् । भा॒नु॒मनु॑ । अ॒न्वि॑हि । इ॒हि॒ ज्योति॑ष्मतः । ज्योति॑ष्मतः प॒थः । प॒थो र॑क्ष । र॒क्ष॒ धि॒या । धि॒या कृ॒तान् । कृ॒तानिति॑ कृ॒तान् ॥ अ॒नु॒ब्रु॒व॒ण॑ व॑यत । व॒य॒त॒ जोगु॑वाम् । जोगु॑वामप॑ः । अपो॒ ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

मनुः । मनुर्भव । भव जनयः । जनया दैव्यँ । दैव्यं जनँ । जनमिति जनँ ॥ मनसो हविः । हविरसि । असि प्रजापतेः । प्रजापतेर्वर्णः । प्रजापतेरिति प्रजा-पतेः । वर्णो गात्राणां । गात्राणां ते । ते गात्रभाजः । गात्रभाजो भूयास्म । गात्रभाज इति गात्र-भाजः । भूयास्मेति भूयास्म ॥॥ इमे वै । इमे इतीमे । वै सह । सहास्ताँ । आस्तां ते । ते वायुः । ते इति ते । वायुर्वि । व्यवात् । अवात्ते । ते गर्भँ । ते इति ते । गर्भम-दधाताम् । अदधातां तं । तꣳ सोमः । सोमः प्र । प्राजनयत् । अजनयदग्निः । अग्निरग्रसत । अग्रसत सः । स एतं । एतं प्रजापतिः । प्रजापतिराग्नेयं । प्रजापतिरिति प्रजा-पतिः । आग्नेयमष्टाकपालं । अष्टाकपालमपश्यत् । अष्टाकपालमित्यष्टा-कपालं । अपश्यत्तं । तं निः । निरवपत् । अवपत्तेन । तेनैव । एवैनाँ । एनामग्नेः । अग्नेरधि । अधि निः । निरक्रीणात् । अक्रीणात्तस्माँत् । तस्मादपि । अप्यन्यदेवत्याँ । अन्यदेवत्यामालभ-मानः । अन्यदेवत्या-मित्यन्य-देवत्याँ । आलभमान आग्नेयं । आलभमान इत्याँ-लभमानः । आग्नेयमष्टाकपालं । अष्टाकपालं पुरस्ताँत् । अष्टाकपालमित्यष्टा-कपालं । पुरस्तान्निः । निर्वपेत् । वपेदग्नेः । अग्नेरेव । एवैनाँ । एनामधि । अधि निष्क्रीय । निष्क्रीया । निष्क्रीयेति निः-क्रीय । आ लभते । लभते यत् । यद्वायुः ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। वायुर्व्यवाँत् । व्यवात्तस्माँत् । व्यवादिति वि-अवाँत् । तस्माँद्वायव्याँ । वायव्यां यत् । यदि मे । इमे गर्भँ । इमे इतीमे । गर्भमदधातां । अदधातां तस्माँत् । तस्माँद्द्यावापृथिव्याँ । द्यावापृथिव्यां यत् । द्यावापृथिव्येति द्यावा-पृथिव्याँ । यथ्सोमः । सोमः प्र । प्राजन- यत् । अजनयदग्निः । अग्निरग्रसत । अग्रसत तस्माँत् । तस्मादग्नीषोमीयाँ । अग्नीषोमीया यत् । अग्नीषोमीयेत्यग्नी-सोमीयाँ । यदनयोः । अनयोर्वियत्योः । वियत्योर्वाक् । वियत्योरिति वि-यत्योः । वागवदत् । अवदत्तस्माँत् । तस्माँथ्सारस्वती । सारस्वती यत् । यत्प्रजापतिः । प्रजापतिरग्नेः । प्रजापतिरिति प्रजा-पतिः

। अग्नेरधि । अधि निरक्रीणात् । निरक्रीणात्तस्मात् । निरक्रीणादिति निः-अक्रीणात् । तस्मात्प्राजापत्या । प्राजापत्या सा । प्राजापत्येति प्राजा-पत्या । सा वै । वा एषा । एषा सर्वदेवत्या । सर्वदेवत्या यत् । सर्वदेवत्येति सर्व-देवत्या । यदजा । अजा वशा । वशा वायव्या । वायव्यामा । आ लभेत । लभेत भूतिकामः । भूतिकामो वायुः । भूतिकाम इति भूति-कामः । वायुर्वै । वै क्षेपिष्ठा । क्षेपिष्ठा देवता । देवता वायुं । वायुमेव । एव स्वेन ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। स्वेन भागधेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सः । स एव । एवैन । एनं भूति । भूति गमयति । गमयति द्यावापृथिव्या । द्यावापृथिव्यामा । द्यावापृथिव्यामिति द्यावा-पृथिव्या । आ लभेत । लभेत कृषमाणः । कृषमाणः प्रतिष्ठाकामः । प्रतिष्ठाकामो दिवः । प्रतिष्ठाकाम इति प्रतिष्ठा-कामः । दिव एव । एवास्मै । अस्मै पर्जन्यः । पर्जन्यो वर्षति । वर्षति वि । व्यस्याम् । अस्यामोषधयः । ओषधयो रोहन्ति । रोहन्ति समर्धुकं । समर्धुकमस्य । समर्धुकमिति सं-अर्धुकं । अस्य सस्यम् । सस्यं भवति । भवत्यग्नीषो- मीया । अग्नीषोमीयामा । अग्नीषोमीयामित्यग्नी-सोमीया । आ लभेत । लभेत यः । यः कामयेत । कामयेतान्नवान् । अन्नवानन्नादः । अन्नवानित्यन्न-वान् । अन्नादस्या । अन्नाद इत्यन्न-अदः । स्यामिति । इत्यग्निना । अग्निनैव । एवान्न । अन्नमव । अव रुन्धे । रुन्धे सोमेन । सोमेनान्नाद्य । अन्नाद्यमन्नवान् । अन्नाद्यमित्यन्न-अद्य । अन्नवानेव । अन्नवानित्यन्न-वान् । एवान्नादः । अन्नादो भवति । अन्नाद इत्यन्न-अदः । भवति सारस्वतीम् । सारस्वती मा । आ लभेत । लभेत यः । य ईश्वरः ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। ईश्वरो वाचः । वाचो वर्दितोः । वर्दितोस्सन्न् । सन्वाचँ । वाचं न । न वर्दँत् । वर्दद्वाक् । वाग्वै । वै सरस्वती । सरस्वती सरस्वतीं । सरस्वतीमेव । एव स्वेन । स्वेन भाग- धेयेन । भागधेयेनोप । भागधेयेनेति भाग-धेयेन । उप धावति । धावति सा । सैव । एवास्मिन्न् । अस्मिन्वाचँ । वाचं दधाति । दधाति प्राजा- पत्यां । प्राजापत्यामा । प्राजापत्यामिति प्राजा-पत्याम् । आ लभेत । लभेत यः । यः कामयेत । कामयेतानभिजितं । अनभिजितमभि । अनभिजितमित्यनभि-जितं । अभि जयेयं । जयेयमिति । इति प्रजापतिः । प्रजापतिस्सर्वाः । प्रजापतिरिति प्रजा-पतिः । सर्वा देवताः । देवता देवताभिः । देवताभिरेव । एवानभिजितं । अनभिजितमभि । अनभिजितमित्यनभि-जितं । अभि जयति । जयति वायव्यया । वायव्ययोपाकरोति । उपाकरोति वायोः । उपाकरोतीत्युप-आकरोति । वायोरेव । एवैना । एनामवरुध्य । अवरुध्या । अवरुध्येत्यव-रुध्य । आ लभते । लभत आकूत्यै । आकूत्यै ब्रा । आकूत्या इत्या-कूत्यै । ब्रा कामाय । कामाय ब्रा । ब्रेति ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। इत्याह । आह यथायजुः । यथायजुरेव । यथायजुरिति यथा-यजुः । एवैतत् । एतत्किक्किटाकारँ । किक्किटाकार जुहोति । किक्किटाकारमिति किक्किटा-कारँ । जुहोति किक्किटाकारेण । किक्किटाकारेण वै । किक्किटाकारेणेति किक्किटा-कारेण । वै ग्राम्याः । ग्राम्याः पशवः । पशवो रमन्ते । रमन्ते प्र । प्रारण्याः । आरण्याः पतन्ति । पतन्ति यत् । यत्किक्किटाकारँ । किक्किटाकार जुहोति । किक्किटाकारमिति किक्किटा-कारँ । जुहोति ग्राम्याणा । ग्राम्याणा पशूनां । पशूनां धृत्यै । धृत्यै पर्यग्नौ । पर्यग्नौ क्रियमाणे । पर्यग्नाविति परि-अग्नौ । क्रियमाणे जुहोति । जुहोति जीवन्तीम् । जीवन्तीमेव । एवैना । एनाꣳ सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गं । लोकं गमयति । गमयति ब्रं । ब्रं तुरीया । तुरीया वशिनी । वशिनी वशा । वशाऽसि । असीति । इत्याह । आह देवत्रा । देवत्रैव । देवत्रेति देव-त्रा । एवैना

। एनां गमयति । गमयति सत्याः । सत्यास्सन्तु । सन्तु यजमानस्य । यजमानस्य कामाः । कामा इति । इत्याह । आहेषः । एष वै । वै कामः । कामो यजमानस्य ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। यजमानस्य यत् । यदनार्तः । अनार्त उदृचँ । उदृचं गच्छति । उदृचमित्युत्-ऋचँ । गच्छति तस्मात् । तस्मादेवं । एवमाह । आहाजा । अजाऽसि । असि रयिष्ठा । रयिष्ठेति । रयिष्ठेति रयि-स्था । इत्याह । आहेषु । एष्वेव । एवैनाँ । एनां लोकेषु । लोकेषु प्रति । प्रतिष्ठापयति । स्थापयति दिवि । दिवि तेँ । ते बृहत् । बृहद्भाः । भा इति । इत्याह । आह सुवर्गे । सुवर्ग एव । सुवर्ग इति सुवः-गे । एवास्मैँ । अस्मे लोके । लोके ज्योतिः । ज्योतिर्दधाति । दधाति तन्तुँ । तन्तुं तन्वन् । तन्वन्रजसः । रजसो भानुं । भानुमनु । अन्विहि । इहीति । इत्याह । आहेमान् । इमानेव । एवास्मैँ । अस्मे लोकान् । लोकान्ज्योतिष्मतः । ज्योतिष्मतः करोति । करोत्यनुल्बणं । अनुल्बणं वयत । वयत जोगुवाम् । जोगुवामपः । अप इति । इत्याह ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -7,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। आह यत् । यदेव । एव यज्ञे । यज्ञ उल्बणँ । उल्बणं क्रियतेँ । क्रियते तस्य । तस्येव । एवैषा । एषा शान्तिः । शान्तिर्मनुः । मनुर्भव । भव जनय । जनया दैव्यँ । दैव्यं जनँ । जनमिति । इत्याह । आह मानव्यः । मानव्यो वै । वै प्रजाः । प्रजा स्ताः । प्रजा इति प्र-जाः । ता एव । एवाद्याः । आद्याः कुरुते । कुरुते मनसः । मनसो हविः । हविरसि । असीति । इत्याह । आह स्वगाकृत्ये । स्वगाकृत्ये गात्राणां । स्वगाकृत्या इति स्वगा-कृत्ये । गात्राणां ते । ते गात्र-भाजः । गात्रभाजो भूयास्म । गात्रभाज इति गात्र-भाजः । भूयास्मेति । इत्याह । आहाशिषँ । आशिषमेव ।

आ॒शिष॒मित्या॑-शिष॑ । ए॒वैतां । ए॒तामा । आशा॑स्ते । शा॒स्ते॒तस्यै॑ । तस्ये॒ वै । वा ए॒तस्याः॑ । ए॒तस्या॒ एक॑म् । एक॑मे॒व । ए॒वादे॑वयजनं । अदे॑वयजनं॒ यत् । अदे॑वयजन॒मित्यदे॑व-यजनं । यदाल॑ब्धायां । आल॑ब्धायाम॒भ्रः । आल॑ब्धाया॒मित्या-ल॒ब्धा॒याम् । अ॒भ्रो भव॑ति ()

काण्ड -3, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -8,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। भव॑ति॒ यत् । यदाल॑ब्धायाम् । आल॑ब्धायाम॒भ्रः । आल॑ब्धाया-मित्या-ल॒ब्धा॒याम् । अ॒भ्र॒स्स्यात् । स्याद॒प्सु । अ॒प्सु वा॑ । अ॒प्स्वित्यप्-सु । वा प्र॒वेश॑येत् । प्र॒वेश॑येथ्सवौ॑ । प्र॒वेश॑येदिति॑ प्र-वेश॑येत् । सवौ॑ वा । वा प्र । प्राश्नी॑यात् । अ॒श्नी॒या॒द्यत् । यद॒प्सु । अ॒प्सु प्र॑वेश॑येत् । अ॒प्स्वित्यप्-सु । प्र॒वेश॑येद॒ज्ञवेश॑सं । प्र॒वेश॑येदिति॑ प्र-वेश॑येत् । य॒ज्ञवेश॑सं कु॑र्यात् । य॒ज्ञवेश॑समिति॑ यज्ञ-वेश॑सं । कु॒र्या॒थ्सवौ॑ । सवा॑मे॒व । ए॒व प्र । प्राश्नी॑यात् । अ॒श्नी॒या॒दिन्द्रि॒यम् । इ॒न्द्रि॒यमे॒व । ए॒वात्मन्न् । आ॒त्मन्ध॑त्ते । ध॒त्ते॒ सा । सा वै । वा ए॒षा । ए॒षा त्र॑याणां । त्र॒याणामे॒व । ए॒वाव॑रुद्धा । अव॑रुद्धा संवथ्सर॒सद॑ः । अव॑रुद्धे॒त्यव॑-रुद्धा । सं॒व॒थ्स॒र॒सद॒स्सह॑स्रयाजिनः॑ । सं॒व॒थ्स॒र॒सद॒ इति॑ संवथ्सर-सद॑ः । स॒ह॒स्र॒या॒जिनो॑ गृह॒मे॒धिन॑ः । स॒ह॒स्र॒या॒जिन॒ इति॑ सहस्र-याजिन॑ः । गृ॒ह॒मे॒धिन॒स्ते । गृ॒ह॒मे॒धिन॒ इति॑ गृह-मे॒धिन॑ः । त ए॒व । ए॒वैतया॑ । ए॒तया॑यजेरन्न् । य॒जे॒र॒न्तेषा॑ । तेषा॑मे॒व । ए॒वैषा । ए॒षाऽऽप्ता । आप्ते॒त्याप्ता () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -4, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

चि॒त्तं च॑ । च॒ चित्ति॑ः । चित्ति॑श्च । चा कू॒तं । आकू॑तं च । आकू॑त॒मित्या-कू॒त॒ं । चाकू॑तिः । आकू॑तिश्च । आकू॑ति॒रित्या-कू॒तिः॒ । च॒ विज्ञा॑तं । विज्ञा॑तं च । विज्ञा॑त॒मिति॒ वि-ज्ञा॒त॒ं । च॒ विज्ञा॑न॑ं । विज्ञा॑न॑ं च । विज्ञा॒न॒मिति॑ वि-ज्ञा॑न॑ं । च॒ मन॑ः । मन॑श्च । च॒ शक्व॑रीः । शक्व॑रीश्च । च॒ दर्श॑ः । दर्श॑श्च । च॒ पूर्णमा॑सः । पूर्णमा॑सश्च । पूर्णमा॑स॒ इति॑ पूर्ण-

मासः । च बृहत् । बृहच्च । च रथंतरं । रथन्तरं चं । रथन्तरमितिं रथं-तरं । च प्रजापंतिः । प्रजापंतिर्जयान् । प्रजापंतिरितिं प्रजा-पतिः । जयानिंद्रांय । इंदांय वृष्णैं । वृष्णे प्र । प्रायच्छत् । अयच्छदुग्रः । उग्रः पृंतनाज्येंषु । पृतनाज्येंषु तस्मैं । तस्मे विशः । विशस्सं । समंनमन्त । अनमंत सर्वाः । सर्वास्सः । स उग्रः । उग्रस्सः । स हि । हि हव्यः । हव्यो बभूवं । बभूवं देवासुराः । देवासुरास्संयंत्ताः । देवासुरा इतिं देव-असुराः । संयंत्ता आसन्न् । संयंत्ता इति सं-यत्ताः । आसन्थ्सः । स इंद्रः । इंद्रः प्रजापंतिं । प्रजापंतिमुपं । प्रजापंतिमितिं प्रजा-पतिं । उपांधावत् । अधावत्तस्मैं । तस्मां एतान् । एताञ्जयान् । जयान्प्र । प्रायंच्छत् । अयच्छत्तान् । तानंजुहोत् । अजुहोत्ततः । ततो वै । वै देवाः । देवा असुंरान् । असुंरानजयन्न् । अजयन्, यत् । यदजंयन्न् । अजंयन्तत् । तज्जयानां । जयानां जयबं । जयब्बः स्पर्धमानेन । जयब्बमितिं जय-ब्बम् । स्पर्धमानेनेते । एते होतव्याः । होतव्या जयंति । जयंत्येव । एव तां । तां पृतंनाम् । पृतंनामिति पृतंनाम् () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -5, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

अग्नि र्भूतानाँ । भूतानामधिंपतिः । अधिंपतिस्सः । अदिंपतिरित्यधिं-पतिः । स माँ । माऽवतु । अवब्बिंद्रः । इंद्रौं ज्येष्ठानाँ । ज्येष्ठानाँ यमः । यमः पृंथिव्याः । पृथिव्या वायुः । वायुरन्तरिंक्षस्य । अन्तरिंक्षस्य सूर्यः । सूर्यो दिवः । दिवश्चन्द्रमाः । चन्द्रमा नक्षंत्राणां । नक्षंत्राणां बृहस्पतिः । बृहस्पतिर्ब्रह्मंणः । ब्रह्मंणो मित्रः । मित्रस्सत्यानाँ । सत्यानां वरुंणः । वरुंणोऽपां । अपाꣳ संमुद्रः । समुद्रस्स्रोत्यानाँ । स्रोत्यानामन्नँ । अन्नꣳ साम्राँज्यानां । साम्राँज्यनामधिंपति । साम्राँज्यानामिति सां-राज्या-नाम् । अधिंपति तत् । अधिंपतीत्यधिं-पति । तन्माँ । माऽवतु । अवतु सोमः । सोम ओषंधीनां । ओषंधीनाꣳ सविता । सविता पंसवानाँ । प्रसवानाꣳ रुद्रः । प्रसवानामितिं प्र-सवानाँ । रुद्रः पंशूनां । पशूनां ब्बष्टाँ । ब्बष्टा रूपाणाँ । रूपाणां विष्णुः । विष्णुः पर्वतानां । पर्वतानां मरुतः । मरुतो गणानाँ । गणानामधिंपतयः । अधिंपतयस्ते । अधिंपतय इत्यधिं-पतयः । ते माँ । माऽवन्तु । अवन्तु पितंरः । पितंरः पितामहाः । पितामहाः परे

। परेऽवरे । अवरे ततााः । ततााँस्तताम्हाः । तताम्हा ह्इह । ह्इह माँ । माऽवत । अवतेत्यवत ॥ अस्मिन्ब्रह्मन्न् । ब्रह्मन्नस्मिन्न् । अस्मिन्क्षत्रे । क्षत्रेऽस्याम् । अस्यामाशिषि । आशिष्यस्यां । आशिषीत्याँ-शिषि । अस्यां पुरोधायाँ । पुरोधायाम्मस्मिन्न् । पुरोधायामिति पुरः-धायाँ । अस्मिन्कर्मन्न् । कर्मन्नस्यां । अस्यां देवहूत्याम् । देवहूत्यामिति देव-हूत्याम् () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -6, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

देवा वै । वै यत् । यद्यज्ञे । यज्ञेऽकुर्वत । अकुर्वत तत् । तदसुराः । असुरा अकुर्वत । अकुर्वत ते । ते देवाः । देवा एतान् । एतानभ्यातानान् । अभ्यातानानपश्यन्न् । अभ्यातानानित्यभि-आतानान् । अपश्यन्तान् । तानभ्यातन्वत । अभ्यातन्वत यत् । अभ्यातन्वतेत्यभि-अतन्वत । यद्देवानाँ । देवानां कर्म । कर्मासीत् । आसीदार्ध्यत । आर्ध्यत तत् । तद्यत् । यदसुराणां । असुराणां न । न तत् । तदार्ध्यत । आर्ध्यत येन । येन कर्मणा । कर्मणेर्ध्सेत् । ईर्ध्सेत्तत्र । तत्र होतव्याँ । होतव्या ऋध्नोति । ऋध्नोत्येव । एव तेन । तेन कर्मणा । कर्मणा यत् । यद्विश्वे । विश्वे देवाः । देवास्समभरन् । समभरन्तस्मात् । समभरनिति सं-अभरन् । तस्मादभ्यातानाः । अभ्यातानाा वैश्वदेवाः । अभ्यातानाा इत्यभि-आतानाः । वैश्वदेवा यत् । वैश्वदेवा इति वैश्व-देवाः । यत्प्रजापतिः । प्रजापति-र्जयान् । प्रजापतिरितिप्रजा-पतिः । जयान्प्र । प्रायच्छत् । अयच्छत्तस्मात् । तस्माज्जयाँ । जयाँ प्राजापत्याः । प्राजापत्या यत् । प्राजापत्या इति प्राजा-पत्याः ()

काण्ड -3, प्रपाठक -4, अनुवाक -6, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। यद्रा॑ष्ट्र भृद्भिः । रा॒ष्ट्रभृ॒द्भी रा॒ष्ट्रं । रा॒ष्ट्र भृ॒द्भिरिति॑ राष्ट्रभृत्-भिः । रा॒ष्टमा । आ द॑दत । अद॑दत॒ तत् । तद्रा॑ष्ट्रभृ॒ता॑ । रा॒ष्ट्रभृ॒ता॑ꣳ राष्ट्रभृ॒च्चं । रा॒ष्ट्रभृ॒तामिति॑ राष्ट्र-भृ॒ता॑ । रा॒ष्ट्रभृ॒च्चं ते । रा॒ष्ट्रभृ॒च्चमिति॑ राष्ट्रभृत्-चं । ते दे॒वाः । देवा अ॑भ्याता॒नैः । अ॒भ्या॒ता॒नैर॑सु॒रान् । अ॒भ्या॒ता॒नैरित्य॑भि-आता॒नैः । अ॒सु॒रान॒भ्यात॑न्वत । अ॒भ्यात॑न्वत॒ जये॑ः । अ॒भ्यात॑न्व॒तेत्य॑भि-आत॑न्वत । जये॑रजयन्न् । अ॒ज॒य॒न्ना॒ष्ट्रभृ॒द्भिः । रा॒ष्ट्रभृ॒द्भी रा॒ष्ट्रं । रा॒ष्ट्रभृ॒द्भिरिति॑ राष्ट्रभृत्-भिः । रा॒ष्ट्रमा । आ द॑दत । अद॑दत॒ यत् । यद्देवाः । देवा अ॑भ्याता॒नैः । अ॒भ्या॒ता॒नैर॑सु॒रान् । अ॒भ्या॒ता॒नैरित्य॑भि-आता॒नैः । अ॒सु॒रान॒भ्यात॑न्वत । अ॒भ्यात॑न्वत॒ तत् । अ॒भ्यात॑न्व॒तेत्य॑भि-आत॑न्वत । तद॑भ्याता॒नाना॑ । अ॒भ्या॒ता॒नाना॑मभ्याता॒नच्चं । अ॒भ्या॒ता॒नाना॒मित्य॑भि-आता॒नाना॑ । अ॒भ्या॒ता॒नच्चं यत् । अ॒भ्या॒ता॒नच्च॒मित्य॑भ्याता॒न-चम् । यज्जये॑ः । जये॑रज॑यन्न् । अज॑यन्॒तत् । तज्जया॑नां । जया॑नां जय॒च्चं । ज॒य॒च्चं यत् । ज॒य॒च्च- मिति॑ जय-चम् । यद्रा॑ष्ट्रभृ॒ध्भिः । रा॒ष्ट्रभृ॒द्भी रा॒ष्ट्रं । रा॒ष्ट्रभृ॒द्भिरिति॑ राष्ट्रभृत्-भिः । रा॒ष्ट्रमा । आद॑दत । अद॑दत॒ तत् । तद्रा॑ष्ट्रभृ॒ता॑ । रा॒ष्ट्रभृ॒ता॑ꣳ राष्ट्रभृ॒च्चं । रा॒ष्ट्रभृ॒तामिति॑ राष्ट्र-भृ॒ता॑ । रा॒ष्ट्रभृ॒च्चं ततः॑ । रा॒ष्ट्रभृ॒च्चमिति॑ राष्ट्रभृत्-चम् । ततो॑ दे॒वाः । देवा अ॑भ॒वन्न् । अ॒भ॒व॒न्परा॑ । पराऽसु॑राः । अ॒सु॒रायः । यो भ्रातृ॑व्यवान् । भ्रातृ॑व्यवा॒न॑स्यात् । भ्रातृ॑व्यवा॒निति॒ भ्रातृ॑व्य-वा॒न् । स्याथ्सः । स ए॒तान् । ए॒ताञ्जु॑हुयात् । जु॒हु॒या॒दभ्याता॒नैः । अ॒भ्या॒ता॒नैरे॒व । अ॒भ्या॒ता॒नैरित्य॑भि-आता॒नैः । ए॒व भ्रातृ॑व्यान् । भ्रातृ॑व्या-न॒भ्यात॑नुते । अ॒भ्यात॑नुते॒ जये॑ः । अ॒भ्यात॑नु॒त इत्य॑भि-आत॑नुते । जये॑र्जयति । ज॒य॒ति॒रा॒ष्ट्रभृ॒द्भिः । रा॒ष्ट्रभृ॒द्भी रा॒ष्ट्रं । रा॒ष्ट्रभृ॒द्भिरिति॑ राष्ट्रभृत्-भिः । रा॒ष्ट्र मा । आ द॑त्ते । द॒त्ते भव॑ति । भव॑त्यात्मना॑ । आ॒त्म॒ना परा॑ । परा॑ऽस्य । अ॒स्य भ्रातृ॑व्यः । भ्रातृ॑व्यो भवति । भ॒व॒तीति॑ भवति () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -7, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

ऋ॒ता॒पाड॒तध॑ामा । ऋ॒तध॑ामाऽग्निः । ऋ॒तध॑मेत्यृत-धा॒मा॒ । अ॒ग्निर्ग॑न्ध॒र्वः । ग॒न्ध॒र्वस्तस्य॑ । तस्यौष॑धयः । ओष॑धयोऽप्स॒रसः॑ । अ॒प्स॒रस॒ ऊर्जः॑ । ऊर्जो॑ नाम॑ । नाम॒ सः । स इ॒दं । इ॒दं ब्रह्म॑ । ब्रह्म॑ क्ष॒त्रं । क्ष॒त्रं पा॑तु । पा॒तु॒ ताः । ता इ॒दं । इ॒दं ब्रह्म॑ । ब्रह्म॑ क्ष॒त्रं । क्ष॒त्रं पा॑तु । पा॒त्तु॒ तस्मै॑ । तस्मै॒ स्वाहा॑ ॥ स्वाहा॒ ताभ्यः॑ । ताभ्य॒ स्स्वाहा॑ । स्वाहा॑ स॑हितः ।

स꣡꣯ꣳहितो वि꣡श्वसा꣡मा । स꣡ꣳहित इ꣡ति꣡ सं-हितः । वि꣡श्वसा꣡मा꣡ सू꣡र्यः꣡ । वि꣡श्वसा꣡मेति꣡ वि꣡श्व-सा꣡मा꣡ । सू꣡र्यो꣡ गन्ध꣡र्वः । गन्ध꣡र्वस्तस्य꣡ । तस्य꣡ मरी꣡चयः । मरी꣡चयोप्स꣡रसः꣡ । अ꣡प्स꣡रस꣡ आ꣡युवः꣡ । आ꣡युव꣡स्सुषुम्नः । आ꣡युव꣡ इत्या꣡꣯-युवः꣡ । सुषुम्नस्सू꣡र्य꣡-रश्मिः । सुषुम्न इ꣡ति꣡ सु-सुम्नः । सू꣡र्यरश्मिश्च꣡न्द्रमा꣡꣯ः । सू꣡र्यरश्मि꣡रिति꣡ सू꣡र्य꣡-रश्मि꣡ः । च꣡न्द्रमा꣡ गन्ध꣡र्वः । गन्ध꣡र्वस्तस्य꣡ । तस्य꣡ नक्ष꣡त्राणि । नक्ष꣡त्राण्यप्स꣡रसः꣡ । अ꣡प्स꣡रसो꣡ बे꣡कुर꣡यः । बे꣡कुर꣡यो भुञ्जुः । भुञ्जुस्सुप꣡र्णः । सुप꣡र्णो य꣡ज्ञः । सुप꣡र्ण इ꣡ति꣡ सु-प꣡र्णः । य꣡ज्ञो ग꣡न्ध꣡र्वः । गन्ध꣡र्वस्तस्य꣡ । तस्य꣡ दक्षि꣡णाः । दक्षि꣡णा अप्स꣡रसः꣡ । अ꣡प्स꣡रस꣡स्स्तवाः । स्त꣡वाः प्र꣡जाप꣡तिः । प्र꣡जाप꣡तिर्वि꣡श्वक꣡र्मा । प्र꣡जाप꣡तिरि꣡ति꣡ प्र꣡जा-प꣡तिः । वि꣡श्वक꣡र्मा꣡मनः꣡ । वि꣡श्वक꣡र्मे꣡ति꣡ वि꣡श्व-क꣡र्मा꣡ । मनो꣡ गन्ध꣡र्वः ()

काण्ड -3, प्रपाठक -4, अनुवाक -7, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। गन्ध꣡र्वस्तस्य꣡ । तस्य꣡र्क्सा꣡मानि꣡ । ऋक्सामान्य꣡प्स꣡रसः꣡ । ऋक्सामानीत्यृ꣡क्-सा꣡मानि꣡ । अ꣡प्स꣡रसो꣡ वह्न꣡यः । वह्न꣡य इ꣡षि꣡रः । इ꣡षि꣡रो वि꣡श्वव्य꣡चाः । वि꣡श्वव्य꣡चावातः꣡ । वि꣡श्वव्य꣡चा꣡ इ꣡ति꣡ वि꣡श्व-व्यचा꣡ः । वातो꣡ गन्ध꣡र्वः । गन्ध꣡र्वस्तस्य꣡ । तस्यापः꣡ । आपो꣡꣯प्स꣡रसः꣡ । अ꣡प्स꣡रसो꣡ मु꣡दाः । मु꣡दा भुव꣡नस्य । भुव꣡नस्य पते । प꣡ते यस्य꣡ । यस्य꣡ ते । त꣡ उ꣡परि꣡ । उ꣡परि꣡ गृ꣡हाः । गृ꣡हा इ꣡ह । इ꣡ह च꣡ । चे꣡ति꣡ च ॥ स नः꣡ । नो꣡ रास्व । रास्वाज्या꣡नि꣡ । अज्या꣡निꣳ रा꣡यः । रा꣡यस्पोषँ꣡ । पोषꣳ सुवी꣡यँ꣡ । सुवी꣡र्यꣳ संवथ्स꣡रीणाँ꣡ । सुवी꣡र्यमिति꣡ सु-वी꣡यँ꣡ । स꣡ंवथ्स꣡रीणाꣳ स्व꣡स्ति꣡ । स꣡ंवथ्स꣡रीणामिति꣡ सं-वथ्स꣡रीणाँ꣡ । स्व꣡स्तिमिति꣡ स्व꣡स्ति꣡ ॥ प꣡रमेष्ठ्यधि꣡पतिः । अधि꣡पतिर्मृत्युः । अधि꣡पतिरित्यधि꣡-पतिः । मृत्युर्ग꣡न्ध꣡र्वः । गन्ध꣡र्वस्तस्य꣡ । तस्य विश्वँ꣡ । विश्व꣡मप्स꣡रसः꣡ । अ꣡प्स꣡रसो भुवः꣡ । भुव꣡स्सुक्षि꣡तिः । सुक्षि꣡तिस्सुभू꣡तिः । सुक्षि꣡तिरि꣡ति꣡ सु-क्षि꣡तिः । सुभू꣡तिर्भद्रकृत् । सुभू꣡तिरिति꣡ सु-भू꣡तिः । भद्रकृथ्सुव꣡र्वान् । भद्रकृदिति꣡ भद्र-कृत् । सुव꣡र्वान्प꣡र्ज꣡न्यः꣡ । सुव꣡र्वानिति꣡ सुव꣡ः-वान् । प꣡र्ज꣡न्यो꣡ गन्ध꣡र्वः । गन्ध꣡र्वस्तस्य꣡ । तस्य꣡ वि꣡द्युतः꣡ । वि꣡द्युतो꣡꣯प्स꣡रसः꣡ । वि꣡द्यु꣡त इ꣡ति꣡ वि-द्युतः꣡ । अ꣡प्स꣡रसो रुचः꣡ । रुचो꣡ दू꣡रे꣡हे꣡तिः । दू꣡रे꣡हे꣡तिरमृ꣡डयः । दू꣡रे꣡हे꣡तिरि꣡ति꣡ दू꣡रे- हे꣡तिः । अ꣡मृ꣡डयो मृत्युः ()

काण्ड -3, प्रपाठक -4, अनुवाक -7, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। मृत्युर्गन्धर्वः । गन्धर्वस्तस्य । तस्य प्रजाः । प्रजा अप्सरसः । प्रजा इति प्र-जाः । अप्सरसो भीरुवः । भीरुवश्चारुः । चारुः कृपणकाशी । कृपणकाशी कामः । कृपणकाशीति कृपण-काशी । कामो गन्धर्वः । गन्धर्वस्तस्य । तस्याधयः । आधयोऽप्सरसः । आधय इत्याँ-धयः । अप्सरसश्शोचयन्तीः । शोचयन्तीर्नामं । नाम सः । स इदं । इदं ब्रह्म । ब्रह्म क्षत्रं । क्षत्रं पातु । पातु ताः । ता इदं । इदं ब्रह्म । ब्रह्म क्षत्रं । क्षत्रं पाँतु । पातु तस्मैँ । तस्मै स्वाहाँ । स्वाहा ताभ्यः । ताभ्यस्स्वाहाँ । स्वाहा सः । स नः । नो भुवनस्य । भुवनस्य पते । पते यस्य । यस्य ते । त उपरिं । उपरिं गृहाः । गृहा इह । इह च । चेति च ॥ उरु ब्रह्मणे । ब्रह्मणेऽस्मै । अस्मै क्षत्राय । क्षत्राय महि । महि शर्म । शर्म यच्छ । यच्छति यच्छ () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

राष्टंकामाय होतव्याँः । राष्टकामायेति राष्ट्र-कामाय । होतव्या राष्ट्रं । राष्ट्रं वै । वै राँष्ट्रभृतः । राष्ट्रभृतो राष्ट्रेण । राष्ट्रभृत इति राष्ट्र-भृतः । राष्ट्रेणैव । एवास्मैँ । अस्मै राष्ट्रं । राष्ट्रमवं । अवं रुन्धे । रुन्धे राष्ट्रं । राष्ट्रमेव । एव भवति । भवत्यात्मनैँ । आत्मनें होतव्याँः । होतव्या राष्ट्रं । राष्ट्रं वै । वै राँष्ट्रभृतः । राष्ट्रभृतो राष्ट्रं । राष्ट्रभृत इति राष्ट्र-भृतः । राष्ट्रं प्रजा । प्रजा राष्ट्रं । प्रजेति प्र-जा । राष्ट्रं पशवः । पशवो राष्ट्रं । राष्ट्रं यत् । यच्छ्रेष्ठः । श्रेष्ठो भवति । भवति राष्ट्रेण । राष्ट्रेणैव । एव राष्ट्रं । राष्ट्रमवं । अवं रुन्धे । रुन्धे वसिष्ठ । वसिष्ठ-स्समानानाँ । समानानाँ भवति । भवति ग्रामकामाय । ग्रामकामाय होतव्याँः । ग्रामकामायेति ग्राम-कामाय । होतव्या राष्ट्रं । राष्ट्रं वै । वै राँष्ट्रभृतः । राष्ट्रभृतो राष्ट्रं । राष्ट्रभृत इति राष्ट्र-भृतः । राष्ट्रꣳ संजाताः । सजाता राष्ट्रेण । सजाता इति स-जाताः । राष्ट्रेणैव । एवास्मैँ । अस्मै राष्ट्रं । राष्ट्रꣳ संजातान् । सजातानवं । सजातानिति स-जातान् । अवं रुन्धे । रुन्धे ग्रामी । ग्राम्येव ()

काण्ड -3, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। एव भवति । भवत्यधि देवने । अधिदेवने जुहोति । अधिदेवन इत्यधि-देवने । जुहोत्यधि देवने । अधिदेवन एव । अधिदेवन इत्यधि-देवने । एवास्मै । अस्मै सजातान् । सजातानव । सजातानिति स-जातान् । अव रुन्धे । रुन्धे ते । त एनं । एनमवरुद्धाः । अवरुद्धा उप । अवरुद्धा इत्यव-रुद्धाः । उप तिष्ठन्ते । तिष्ठन्ते रथमुखे । रथमुख ओजस्कामस्य । रथमुख इतिरथ-मुखे । ओजस्कामस्य होतव्याः । ओजस्कामस्येत्योजः-कामस्य । होतव्या ओजः । ओजो वै । वै राष्ट्रभृतः । राष्ट्रभृत ओजः । राष्ट्रभृत इति राष्ट्र-भृतः । ओजो रथः । रथ ओजसा । ओजसैव । एवास्मै । अस्मा ओजः । ओजोव । अव रुन्धे । रुन्ध ओजस्वी । ओजस्वेव । एव भवति । भवति यः । यो राष्ट्रात् । राष्ट्रादपभूतः । अपभूतस्स्यात् । अपभूत इत्यप-भूतः । स्यात्तस्मै । तस्मै होतव्याः । होतव्या यावन्तः । यावन्तोस्य । अस्य रथाः । रथास्स्युः । स्युस्तान् । तान्ब्रूयात् । ब्रूयाद्युङ्ध्वम् । युङ्ध्वमिति । इति राष्ट्रं । राष्ट्रमेव । एवास्मै । अस्मै युनक्ति । युनक्त्याहुतयः ()

काण्ड -3, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। आहुतयो वै । आहुतय इत्या-हुतयः । वा एतस्य । एतस्याक्लृप्ताः । अक्लृप्ता यस्य । यस्य राष्ट्रं । राष्ट्रं न । न कल्पते । कल्पते स्वरथस्य । स्वरथस्य दक्षिणं । स्वरथस्येति स्व-रथस्य । दक्षिणं चक्रं । चक्रं प्रवृह्य । प्रवृह्य नाडीम् । प्रवृह्येति प्र-वृह्य । नाडीमभि । अभि जुहुयात् । जुहुयादाहुतीः । आहुतीरेव । आहुतीरित्या-हुतीः । एवास्य । अस्य कल्पयति । कल्पयति ताः । ता अस्य । अस्य कल्पमाना । कल्पमाना राष्ट्रं । राष्ट्रमनु । अनु कल्पते । कल्पते सङ्ग्रामे । सङ्ग्रामे संयत्ते । सङ्ग्राम इति सं-ग्राम । संयत्ते होतव्याः । संयत्त इति सं-यत्ते । होतव्या राष्ट्रं । राष्ट्रं वै ।

वै रा॑ष्ट्रभृतः । रा॒ष्ट्र॒भृतो॑ रा॒ष्ट्रे । रा॒ष्ट्र॒भृत॒ इति॑ राष्ट्र-भृतः । रा॒ष्टे खलु॑ । खलु॒ वै । वा ए॒ते । ए॒ते व्याय॑च्छन्ते । व्याय॑च्छन्ते॒ ये । व्याय॑च्छन्त॒ इति॑ वि-आय॑च्छन्ते । ये स॑ङ्ग्रा॒मम् । स॒ङ्ग्रा॒मꣳ सं॒यन्ति॑ । स॒ङ्ग्रा॒ममिति॑ सं-ग्रा॒मम् । सं॒यन्ति॒ यस्य॑ । सं॒यन्तीति॑ सं-यन्ति॑ । यस्य॒ पूर्व॑स्य । पूर्व॑स्य जुह्वति । जुह्व॑ति सः । स ए॒व । ए॒व भ॑वति । भ॒व॒ति॒ जय॑ति । जय॑ति तम् । तꣳ स॑ङ्ग्रा॒मम् । स॒ङ्ग्रा॒मं मा॑न्थु॒कः । स॒ङ्ग्रा॒ममिति॑ सं-ग्रा॒मम् । मा॒न्थु॒क इ॒ध्मः । इ॒ध्मो भ॑वति ()

काण्ड -3, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। भ॒व॒त्यङ्गा॑राः । अङ्गा॑रा ए॒व । ए॒व प्र॑ति॒वेष्ट॑मानाः । प्र॒ति॒वेष्ट॑माना अ॒मित्रा॑णां । प्र॒ति॒वेष्ट॑माना॒ इति॑ प्रति-वेष्ट॑मानाः । अ॒मित्रा॑णामस्य । अ॒स्य॒ सेना॑म् । सेना॑ं प्रति॑ । प्रति॑वेष्टयन्ति । वे॒ष्ट॒य॒न्ति॒ यः । य उ॒न्मादा॑त् । उ॒न्मादा॒त्तस्मै॑ । उ॒न्मादा॒दित्यु॑त्-मादा॑त् । तस्मै॑ होत॒व्या॑म् । हो॒त॒व्या॑ गन्धर्वाप्स॒रसः॑ । ग॒न्ध॒र्वा॒प्स॒रसो॒ वै । ग॒न्ध॒र्वा॒प्स॒रस॒ इति॑ गन्धर्व-अ॒प्स॒रसः॑ । वा ए॒तम् । ए॒तमुत् । उन्मा॑दयन्ति । मा॒द॒य॒न्ति॒ यः । य उ॒न्मा॑द्यति । उ॒न्मा॒द्य॒त्ये॒ते । उ॒न्मा॒द॒तीत्यु॑त्-मा॑द्यति । ए॒ते खलु॑ । खलु॒ वै । वै गं॑धर्वाप्स॒रसः॑ । ग॒न्ध॒र्वा॒प्स॒रसो॒ यत् । ग॒न्ध॒र्वा॒प्स॒रस॒ इति॑ गन्धर्व-अ॒प्स॒रसः॑ । यद्रा॑ष्ट्रभृ॒तः । रा॒ष्ट्र॒भृ॒तस्तस्मै॑ । रा॒ष्ट्र॒भृत॒ इति॑ राष्ट्र-भृतः॑ । तस्मै॒ स्वाहा॑ । स्वाहा॒ ताभ्यः॑ । ताभ्य॒ स्स्वाहा॑ । स्वाहेति॑ । इति॑ जुहोति । जु॒हो॒ति॒ तेन॑ । तेनै॒व । ए॒वैनान्॑ । ए॒ना॒ञ्छ्म॒य॒ति॒ । श्म॒य॒ति॒ नैय॑ग्रोधः । नैय॑ग्रोध॒ औदु॑म्बरः । औदु॑म्बर॒ आश्व॑त्थः । आश्व॑त्थः प्लाक्षः॑ । प्ला॒क्ष॒ इति॑ । इती॒ध्मः । इ॒ध्मो भ॑वति । भ॒व॒त्ये॒ते । ए॒ते वै । वै गं॑धर्वाप्स॒रसा॑म् । ग॒न्ध॒र्वा॒प्स॒रसा॑म् गृ॒हाः । ग॒न्ध॒र्वा॒प्स॒रसा॒मिति॑ गन्धर्व-अ॒प्स॒रसा॑म् । गृ॒हाः स्वे । स्व ए॒व । ए॒वैनान्॑ । ए॒ना॒नाय॑तने ()

काण्ड -3, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। आयतने शमयति । आयतन इत्याँ-यतने । शमयत्यभिचरता । अभिचरता प्रतिलोमं । अभिचरतेत्यभि-चरता ।
प्रतिलोमꣳ होतव्याँः । प्रतिलोममिति प्रति-लोमम् । होतव्याँः प्राणान् । प्राणानेव । प्राणानिति प्र-अनान् । एवास्य ।
अस्य प्रतीचः । प्रतीचः प्रति । पति यौति । यौति तम् । तं ततः । ततो येन । येन केन । केन च । च स्तृणुते ।
स्तृणुते स्वकृते । स्वकृत इरिणे । स्वकृत इति स्व-कृते । इरिणे जुहोति । जुहोति प्रदरे । प्रदरे वाँ । प्रदर इति प्र-
दरे । वै तत् । एतद्वै । वा अस्यै । अस्यै निर्ऋतिगृहीतं । निर्ऋतिगृहीतं निर्ऋतिगृहीते । निर्ऋतिगृहीतमिति निर्ऋति-
गृहीतं । निर्ऋतिगृहीत एव । निर्ऋतिगृहीत इति निर्ऋति-गृहीते । एवैनँ । एनं निर्ऋत्या । निर्ऋत्या ग्राहयति ।
निर्ऋत्येति निः-ऋत्या । ग्राहयति यत् । यद्वाचः । वाचः क्रूरं । क्रूरं तेन । तेन वषट् । वषट्करोति । करोति वाचः ।
वाच एव । एवैनँ । एनं क्रूरेण । क्रूरेण प्र । प्रवृश्चति । वृश्चति ताजक् । ताजगार्तिँ । आर्तिमा । आर्च्छति ।
ऋच्छति यस्य । यस्य कामयेत । कामयेतान्नाद्यँ । अन्नाद्यमा । अन्नाद्यमित्यन्न- अद्यँ ()

काण्ड -3, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। आ ददीय । ददीयेति । इति तस्य । तस्य सभायाँ । सभाया-मुत्तानः । उत्तानो निपद्य । उत्तान इत्युत्-तानः ।
निपद्य भुवनस्य । निपद्येति नि-पद्य । भुवनस्य पते । पत इति । इति तृणानि । तृणानि सं । सं गृह्णीयात् ।
गृह्णीयात्प्रजापतिः । प्रजापतिर्वै । प्रजापतिरिति प्रजा-पतिः । वै भुवनस्य । भुवनस्य पतिः । पतिः प्रजापतिना ।
प्रजापतिनैव । प्रजापतिनेति प्रजा-पतिना । एवास्य । अस्यान्नाद्यँ । अन्नाद्यमा । अन्नाद्यमित्यन्न-अद्यँ । आ दत्ते । दत्त
इदं । इदमहं । अहममुष्य । अमुष्यामुष्यायणस्य । आमुष्यायण-स्यान्नाद्यँ । अन्नाद्यꣳ हरामि । अन्नाद्यमित्यन्न-अद्यँ ।
हरामीति । इत्याह । आहान्नाद्यँ । अन्नाद्यमेव । अन्नाद्यमित्यन्न-अद्यँ । एवास्य । अस्य हरति । हरति षड्भिः ।
षड्भिर्हरति । षड्भिरिति षट्-भिः । हरति षट् । षड्वै । वा ऋतवः । ऋतवः प्रजापतिना । प्रजापतिनैव । प्रजापतिनेति

प्रजा-पतिना । एवास्यं । अस्यान्नाद्यँ । अन्नाद्यमादायं । अन्नाद्यमित्यन्न-अद्यँ । आदायर्तवः । आदायेत्याँ-दायं । ऋतवोँस्मै । अस्मा अनुं । अनु प्र । प्रयच्छन्ति । यच्छन्ति यः ()

काण्ड -3, प्रपाठक -4, अनुवाक -8, अनुवाक सूक्तम -7,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। यो ज्येष्ठबंधुः । ज्येष्ठबंधुरपभूतः । ज्येष्ठबंन्धुरितिं ज्येष्ठ-बन्धुः । अपंभूतः स्यात् । अपंभूत इत्यपं-भूतः । स्यात्तं । तः स्थलेँ । स्थलेऽवसाय्यं । अवसाय्यं ब्रह्मौदनं । अवसाय्येत्यंव-साय्यं । ब्रह्मौदनं चतुंश्चरावं । ब्रह्मौदनमितिं ब्रह्म-ओदनं । चतुंश्चरावं पक्का । चतुंश्चरावमितिं चतुंः-शरावम् । पक्का तस्मैं । तस्मैं होतव्याँः । होतव्यां वर्ष्म । वर्ष्म वै । वै राँष्ट्रभृतः । राष्ट्र भृतो वर्ष्म । राष्ट्रभृत इतिं राष्ट्र-भृतः । वर्ष्म स्थलँ । स्थलं वर्ष्मणा । वर्ष्मणैव । एवैनँ । एनं वर्ष्म । वर्ष्मसमानानाँ । समानांनाँ गमयति । गमयति चतुंश्चरावः । चतुंश्चरावो भवति । चतुंश्चराव इति चतुंः-शरावः । भवति दिक्षु । दिक्ष्वेव । एव प्रतिं । प्रतिं तिष्ठति । तिष्ठति क्षीरे । क्षीरे भंवति । भवति रुचँ । रुचमेव । एवास्मिन्वं् । अस्मिनधाति । दधात्युत् । उद्धरति । हरति श्रृतत्वायं । श्रृतत्वायं सर्पिष्वान् । श्रृतत्वायेतिं श्रृत-त्वायं । सर्पिष्वाँन्भवति । भवति मेध्यत्वायं । मेध्यत्वायं चत्वारः । मेध्यत्वायेतिं मेध्य-त्वायं । चत्वारं आर्षेयाः । आर्षेयाः प्र । प्राश्नन्ति । अश्नन्तिदिशां । दिशामेव । एव ज्योतिंषि । ज्योतिंषि जुहोति । जुहोतीतिं जुहोति () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

देविंका निः । निर्वपेत् । वपेत्प्रजाकामः । प्रजाकामश्छनाꣳसि । प्रजाकामं इतिं प्रजा-कामः । छन्दाꣳसि वै । वै देविंकाः । देविंकाश्छन्दाꣳसि । छन्दाꣳसीव । इव खलु । खलु वै । वै प्रजाः । प्रजाश्छन्दोंभिः । प्रजा इतिं प्र-जाः । छन्दोंभिरेव । छन्दोंभिरितिं छन्दः-भिः । एवास्मैं । अस्मै प्रजाः । प्रजाः प्र । प्रजा इतिं प्र-जाः । प्रजनयति । जनयति

प्रथमम् । प्रथमं धातारँ । धातारं करोति । करोति मिथुनी । मिथुनी एव । एव तेन । तेन करोति । करोत्यनु । अन्वेव । एवास्मै । अस्मा अनुमतिः । अनुमतिर्मन्यते । अनुमति-रित्यनु-मतिः । मन्यते राते । राते राका । राका प्र । प्र सिनीवाली । सिनीवाली जनयति । जनयति प्रजासु । प्रजास्वेव । प्रजास्विति प्र-जासु । एव प्रजातासु । प्रजातासु कुह्वाँ । प्रजातास्विति प्र-जातासु । कुह्वां वाचँ । वाचं दधाति । दधात्ये ताः । एता एव । एव निः । निर्वपेत् । वपेत्पशुकामः । पशुकाम्श्छन्दाꣳसि । पशुकाम इति पशु-कामः । छन्दाꣳसि वै । वै देविकाः । देविकाश्छन्दाꣳसि । छन्दाꣳसीव ()

काण्ड -3, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। इव खलु । खलु वै । वै पशवः । पशवश्छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति छन्दः-भिः । एवास्मै । अस्मै पशून् । पशून्प्र । प्र जनयति । जनयति प्रथमं । प्रथमं धातारँ । धातारं करोति । करोति प्र । प्रैव । एव तेन । तेन वापयति । वापयत्यनु । अन्वेव । एवास्मै । अस्मा अनुमतिः । अनुमतिर्मन्यते । अनुमतिरित्यनु-मतिः । मन्यते राते । राते राका । राका प्र । प्र सिनीवाली । सिनीवाली जनयति । जनयति पशून् । पशूनेव । एव प्रजातान् । प्रजातान्कुह्वाँ । प्रजातानिति प्र-जातान् । कुह्वाँ प्रति । प्रतिष्ठापयति । स्थापयत्येताः । एता एव । एव निः । निर्वपेत् । वपेद्ग्रामकामः । ग्रामकामश्छन्दाꣳसि । ग्रामकाम इति ग्राम-कामः । छन्दाꣳसि वै । वै देविकाः । देविकाश्छन्दाꣳसि । छन्दाꣳसीव । इव खलु । खलु वै । वै ग्रामः । ग्रामश्छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति छन्दः-भिः । एवास्मै । अस्मै ग्रामँम् । ग्राममवं ()

काण्ड -3, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। अव॑ रुन्धे । रु॒न्धे॒ म॒ध्यतः । म॒ध्यतो धा॒तार॑म् । धा॒तार॑ं करोति । क॒रोति॑ म॒ध्यतः । म॒ध्यत॒ एव । एवैन॑म् । ए॒न॒ं ग्राम॑स्य । ग्राम॑स्य दधाति । द॒धा॒त्येताः । ए॒ता एव । एवनिः । निर्व॑पेत् । व॒पे॒ज्योगा॑मयावी । ज्योगा॑मयावी॒ छन्दा॑ꣳसि । ज्योगा॑मयावीति॒ ज्योक्-आ॒म॒या॒वी॒ । छन्दा॑ꣳसि॒ वै । वै देवि॑काः । देवि॑काश्छन्दा॑ꣳसि । छन्दा॑ꣳसि॒ खलु॑ । खलु॒ वै । वा ए॒तं । ए॒त म॒भि । अ॒भि मन्य॑ते । मन्य॑ते॒ यस्य॑ । यस्य॒ ज्योक् । ज्योगा॑मयति । आ॒म॒य॒ति॒ छन्दो॑भिः । छन्दो॑भिरेव । छन्दो॑भिरिति॒ छन्दः॑-भिः । एवैन॑म् । ए॒न॒म॒ग॒दम् । अ॒ग॒द ं क॑रोति । क॒रोति॑ म॒ध्यतः । म॒ध्यतो धा॒तार॑म् । धा॒तार॑ं करोति । क॒रोति॑ म॒ध्यतः । म॒ध्यतो वै । वा ए॒तस्य॑ । ए॒तस्याक्लृ॑प्तं । अक्लृ॑प्तं॒ यस्य॑ । यस्य॒ ज्योक् । ज्योगा॑मयति । आ॒म॒य॒ति मध्यतः । म॒ध्यत॒ एव । एवास्य॑ । अ॒स्य॒ तेन॑ । तेन॑ कल्पयति । क॒ यत्येताः । ए॒ता एव । एव निः । निर्व॑पेत् ()

काण्ड -3, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। व॒पे॒द्यं । यं य॒ज्ञः । य॒ज्ञो न । नोप॒नमे॑त् । उ॒प॒नमे॒च्छन्दा॑ꣳसि । उ॒प॒नमे॒दित्यु॑प-नमे॑त् । छन्दा॑ꣳसि॒ वै । वै देवि॑काः । देवि॑काश्छन्दा॑ꣳसि । छन्दा॑ꣳसि॒ खलु॑ । खलु॒ वै । वा ए॒तं । ए॒तं न । नोप॑ । उप॑ नमन्ति । न॒मन्ति॒ यम् । यं य॒ज्ञः । य॒ज्ञो न । नोप॒- नम॑ति । उ॒प॒नम॑ति प्र॒थमं । उ॒प॒नम॒तीत्यु॑प-नम॑ति । प्र॒थमं धा॒तार॑म् । धा॒तार॑ं करोति । क॒रोति॒ मुख॒तः । मुख॒त एव । एवास्मै॑ । अ॒स्मे॒ छन्दा॑ꣳसि । छन्दा॑ꣳसि दधाति । द॒धा॒त्युप॑ । उपै॑न ं । ए॒न॒ं य॒ज्ञः । य॒ज्ञो न॑मति । न॒म॒त्येताः । ए॒ता एव । एव निः । निर्व॑पेत् । व॒पे॒दी॒जा॒नः । ई॒जा॒नश्छन्दा॑ꣳसि । छन्दा॑ꣳसि॒ वै । वै देवि॑काः । देवि॑का या॒तया॑मानि । या॒तया॑मानीव । या॒तया॑मानीति॑ या॒त-या॒मा॒नि॒ । इ॒व॒ खलु॑ । खलु॒ वै । वा ए॒तस्य॑ । ए॒तस्य॒ छन्दा॑ꣳसि । छन्दा॑ꣳसि॒ यः । य ई॑जा॒नः । ई॒जा॒न उ॑त्त॒मं । उ॒त्त॒मं धा॒तार॑म् । उ॒त्त॒ममित्यु॑त्-त॒मम् । धा॒तार॑ं करोति । क॒रो॒त्युप॑रिष्टात् ()

काण्ड -3, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। उपरिष्टादेव । एवास्मै । अस्मे छन्दांऽसि । छन्दाऽस्ययातयामानि । अयातयामान्यवं । अयातयामानीत्ययात-यामानि । अवं रुन्धे । रुन्ध उपं । उपैनं । एनमुत्तरः । उत्तरो यज्ञः । उत्तर इत्युत्-तरः । यज्ञो नमति । नमत्येताः । एता एव । एव निः । निर्वपेत् । वपेद्यं । यं मेधा । मेधान । नोपनमैत् । उपनमेच्छन्दांऽसि । उपनमेदित्युप-नमैत् । छन्दांऽसि वै । वै देविकाः । देविकाश्छन्दांऽसि । छन्दांऽसि खलु । खलु वै । वा एतं । एतं न । नोपं । उपं नमति । नमति यं । यं मेधा । मेधा न । नोपनमति । उपनमति प्रथमं । उपनमतीत्युप-नमति । प्रथमं धातारँ । धातारं करोति । करोति मुखतः । मुखत एव । एवास्मै । अस्मे छन्दांऽसि । छन्दांऽसि दधाति । दधात्युपं । उपैनं । एनं मेधा । मेधा नमति । नमत्येताः । एता एव । एव निः । निर्वपेत् । वपेद्रुक्कामः ()

काण्ड -3, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। रुक्कामश्छन्दांऽसि । रुक्कामं इति रुक्-कामः । छन्दांऽसि वै । वै देविकाः । देविकाश्छन्दांऽसि । छन्दांऽसीव । इव खलु । खलु वै । वै रुक् । रुक्छन्दोभिः । छन्दोभिरेव । छन्दोभिरिति छन्दः-भिः । एवास्मिन्न् । अस्मिन्नुचँ । रुचं दधाति । दधाति क्षीरे । क्षीरे भवन्ति । भवन्तिरुचँ । रुचमेव । एवास्मिन्न् । अस्मिन्दधति । दधति मध्यतः । मध्यतो धातारँ । धातारं करोति । करोति मध्यतः । मध्यत एव । एवैनँ । एनꣳ रुचः । रुचो दधाति । दधाति गायत्री । गायत्री वै । वा अनुमतिः । अनुमतिस्त्रिष्टुक् । अनुमतिरित्यनु-मतिः । त्रिष्टुग्राका । राका जगती । जगती सिनीवाली । सिनीवाल्यनुष्टुप् । अनुष्टुप्कुहूः । अनुष्टुबित्यनु-स्तुप् । कुहूर्धाता । धाता वषट्कारः । वषट्कारः पूर्वपक्षः । वषट्कार इतिं वषट्-कारः । पूर्वपक्षो राका । पूर्वपक्ष इतिं पूर्व-पक्षः । राकाऽपरपक्षः । अपरपक्षः कुहूः । अपरपक्ष इत्यपर-पक्षः । कुहूरमावास्याँ । अमावास्यां सिनीवाली । अमावास्येत्यमा-वास्याँ । सिनीवाली पौर्णमासी । पौर्णमा-स्यनुमतिः । पौर्णमासीतिं पौर्ण-मासी । अनुमतिश्चन्द्रमाः । अनुमतिरित्यनु-मतिः । चन्द्रमा धाता । धाताऽष्टौ । अष्टौ वसवः ()

काण्ड -3, प्रपाठक -4, अनुवाक -9, अनुवाक सूक्तम -7,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। वस॑वोष्टाक्षरा । अ॒ष्टाक्ष॑रा गायत्री । अ॒ष्टाक्ष॒रेत्य॒ष्टा-अ॒क्ष॒रा॒ । गा॒य॒त्र्येका॑दश । एका॑दश रु॒द्राः । रु॒द्रा एका॑दशाक्षरा । एका॑दशाक्षरात्रि॒ष्टुप् । एका॑दशाक्ष॒रेत्येका॑दश-अ॒क्ष॒रा॒ । त्रि॒ष्टुब्द्वाद॑श । द्वाद॑शादि॒त्याः । आ॒दि॒त्या द्वाद॑शाक्षरा । द्वाद॑शाक्षरा॒ ज॒गती । द्वाद॑शाक्ष॒रेति॒ द्वाद॑श-अ॒क्ष॒रा॒ । ज॒गती प्र॒जाप॑तिः । प्र॒जाप॑तिरनु॒ष्टुप् । प्र॒जाप॑ति॒रिति॑ प्र॒जा-प॒तिः॒ । अ॒नु॒ष्टुब्धा॒ता । अ॒नु॒ष्टुबि॑त्य॑नु-स्तुप् । धा॒ता व॑षट्का॒रः । व॒ष॒ट्का॒र ए॒तत् । व॒ष॒ट्का॒र इति॑ वषट्-का॒रः॒ । ए॒तद्वै । वै दे॒वि॑काः । दे॒वि॑कास्सर्वा॑णि । सर्वा॑णि च । च॒ छन्दा॑ꣳसि । छन्दा॑ꣳसि सर्वा॑भिः । सर्वा॑भिश्च । च॒ दे॒वता॑भिः । दे॒वता॑ वषट्का॒रः । व॒ष॒ट्का॒रस्ताः । व॒ष॒ट्का॒र इति॑ वषट्-का॒रः॒ । ता यत् । यथ्सह । स॒ह सर्वा॑भिः । सर्वा॑ नि॒र्व॑पे॒त् । नि॒र्व॑पे॒दीश्वराः । नि॒र्व॑पे॒दिति॑ निः-वप॑ेत् । ई॒श्वरा ए॑नं । ए॒न॒ं प्र॒दह॑ः । प्र॒दहो॒ द्वे । प्र॒दह॒ इति॑ प्र-दह॑ः । द्वे प्र॑थ॒मे । द्वे इति॒ द्वे । प्र॒थ॒मे नि॒रुप्य॑ । प्र॒थ॒मे इति॑ प्रथ॒मे । नि॒रुप्य॑ धा॒तुः । नि॒रुप्ये॑ति॑ निः-उप्य॑ । धा॒तुस्तृ॒तीय॑ं । तृ॒तीय॒ं निः । निर्व॑पेत् । व॒पे॒त्तथो॑ । तथो॒ एव । तथो॒ इति॒ तथो॑ । एवोत्त॑रे । उत्त॑रे॒ निः । उत्त॑रे॒ इत्युत्-त॑रे॒ । निर्व॑पेत् । व॒पे॒त्तथा॑ । तथै॑नं । ए॒न॒ं न । न प्र । प्रद॑हन्ति । द॒हन्त्यथो॑ । अथो॒ यस्मै॑ । अथो॒ इत्यथो॑ । यस्मै॒ काम॑ाय । काम॑ाय नि॒रुप्य॑न्ते । नि॒रुप्य॑न्ते॒ तम् । नि॒रुप्य॑न्त॒ इति॑ निः-उप्य॑न्ते । तमे॒व । ए॒वाभिः । आ॒भिरुप॑ । उपा॑प्नोति । आ॒प्नो॒तीत्या॑प्नोति () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -10, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

वास्तो॑ष्पते । प॒ते प्रति॑ । प्रति॑ जानीहि । जा॒नी॒ह्य॒स्मान् । अ॒स्माꣳस्वा॒वे॒शः । स्वा॒वे॒शो अ॑नमी॒वः । स्वा॒वे॒श इति॑ सु-आ॒वे॒शः । अ॒न॒मी॒वो भ॑व । भ॒वा॒ नः॒ । न॒ इति॑ नः ॥ यद्वा॑ । व॒ इ॒मे । ईम॑हे॒ प्रति॑ । प्रति॒ तत् । तन्नः॑ । नो॒ जु॒ष॒स्व । जु॒ष॒स्व शं । शं नः॑ । न॒ एधि । एधि द्विप॑दे । द्विप॑दे शं । द्विप॒द इति॑ द्वि-प॑दे । शं च॒तु॑ष्पदे । च॒तु॑ष्प॒द इति॑ चतुः-

पदे ॥ वास्तोष्पते । पते शग्मया । शग्मया सꣳसदा । सꣳसदाते । सꣳसदेति सं-सदा । ते सक्षीमहि । सक्षीमहि रण्वया । रण्वया गातुमत्या । गातुमत्येति गातुमत्या ॥ आ वः, क्षेमै । क्षेम उत । उत योगे । योगे वरे । वरं नः । नो यूयं । यूयं पात । पात स्वस्तिभिः । स्वस्तिभिस्सदा । स्वस्तिभिरिति स्वस्ति-भिः । सदा नः । न इति नः ॥ यथ्सायं प्रातः । सायं प्रातरग्निहोत्रं । सायं प्रातरिति सायं-प्रातः । अग्निहोत्रं जुहोति । अग्निहोत्रमित्यग्नि-होत्रं । जुहोत्याहुतीष्टकाः । आहुतीष्टका एव । आहुतीष्टका इत्याहुति-इष्टकाः । एव ताः । ता उप । उप धत्ते । धत्ते यजमानः ()

काण्ड -3, प्रपाठक -4, अनुवाक -10, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। यजमानोऽहोरात्राणि । अहोरात्राणि वै । अहोरात्राणीत्यहः-रात्राणि । वा एतस्य । एतस्येष्टकाः । इष्टका यः । य आहिताग्निः । आहिताग्निर्यत् । आहिताग्निरित्याहित-अग्निः । यथ्सायंप्रातः । सायंप्रातर्जुहोति । सायंप्रातरिति सायं-प्रातः । जुहोत्यहोरात्राणि । अहोरात्राण्येव । अहोरात्राणीत्यहः-रात्राणि । एवास्वा । आस्वेष्टकाः । इष्टकाः कृत्वा । कृत्वोप । उप धत्ते । धत्ते दश । दश समानत्रं । समानत्रं जुहोति । जुहोति दशाक्षरा । दशाक्षरा विराट् । दशाक्षरेति दश-अक्षरा । विराड्विराज । विराडिति वि-राट् । विराजमेव । विराजमिति वि-राज । एवास्वा । आस्वेष्टकां । इष्टकां कृत्वा । कृत्वोप । उप धत्ते । धत्तेऽथो । अथो विराजि । अथो इत्यथो । विराज्येव । विराजीति वि-राजि । एव यज्ञं । यज्ञमाप्नोति । आप्नोति चित्यश्चित्यः । चित्यश्चित्योऽस्य । चित्यश्चित्य इति चित्यः-चित्यः । अस्य भवति । भवति तस्मात् । तस्मादयत्रं । यत्र दश । दशोपित्वा । उपित्वा प्रयाति । प्रयाति तत् । प्रयातीति प्र-याति । तद्यज्ञवास्तु । यज्ञवास्त्ववास्तु । यज्ञवास्त्विति यज्ञ-वास्तु । अवास्त्वेव । एव तत् । तद्यत् । यत्ततः । ततोर्वाचीन । अर्वाचीनꣳ रुद्रः ()

काण्ड -3, प्रपाठक -4, अनुवाक -10, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। रुद्रः खलु । खलु वै । वै वाँस्तोष्पतिः । वास्तोष्पतिर्यत् । वास्तोष्पतिरितिं वास्तोः-पतिः । यदहंब्बा । अहंब्बा वास्तोष्पतीयँ । वास्तोष्पतीयं प्रयायात् । वास्तोष्पतीयमितिं वास्तोः-पतीयँ । प्रयायाद्रुद्रः । प्रयायादितिं प्र-यायात् । रुद्र एंनं । एनं भूब्बा । भूब्बाऽग्निः । अग्निरंनूत्थायं । अनूत्थायंहन्यात् । अनूत्था-येत्यंनु-उत्थायं । हन्याद्वास्तोष्पतीयँ । वास्तोष्पतीयं जुहोति । वास्तोष्पतीयमितिं वास्तोः-पतीयँ । जुहोति भागधेयेंन । भागधेयेंनैव । भागधेयेनेतिं भाग-धेयेंन । एवैनँ । एनꣳ शमयति । शमयति न । नातिँ । आर्तिमा । आर्च्छंति । ऋच्छति यजंमानः । यजंमानो यत् । यद्युक्ते । युक्ते जुंहुयात् । जुहुयाद्यथाँ । यथा प्रयांते । प्रयांते वास्तौँ । प्रयांत इति प्र-यांते । वास्तावाहुंतिं । आहुंतिं जुहोतिं । आहुंतिमित्या-हुतिं । जुहोतिं तादृक् । तादृगेव । एव तत् । तद्यत् । यदयुंक्ते । अयुंक्ते जुहुयात् । जुहुयाद्यथाँ । यथा क्षेमेँ । क्षेम आहुंतिं । आहुंतिं जुहोतिं । आहुंतिमित्या-हुतिं । जुहोतिं तादृक् । तादृगेव । एव तत् । तदहुंतं । अहुंतमस्य । अस्य वास्तोष्पतीयँ । वास्तोष्पतीयꣳः स्यात् । वास्तोष्पतीयमितिं वास्तोः-पतीयँ । स्याद्दक्षिंणः ()

काण्ड -3, प्रपाठक -4, अनुवाक -10, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। दक्षिंणो युक्तः । युक्तो भवंति । भवंति सव्यः । सव्योऽयुंक्तः । अयुक्तोऽथं । अथं वास्तोष्पतीयँ । वास्तोष्पतीयं जुहोति । वास्तोष्पतीयमितिं वास्तोः-पतीयँ । जुहोत्युभयँ । उभयंमेव । एवाकः । अकरपंरिवर्गं । अपंरिवर्गमेव । अपंरिवर्गमित्यपंरि-वर्गं । एवैनँ । एनꣳ शमयति । शमयति यत् । यदेकंया । एकंया जुहुयात् । जुहुयाद्दर्विहोमं । दर्विहोमं कुंर्यात् । दर्विहोममितिं दर्वि-होमम् । कुर्यात्पुरोनु वाक्याँ । पुरोनुवाक्यांमनूच्यं । पुरोनुवाक्यांमितिं पुरः-अनुवाक्याँ । अनूच्यं याज्यंया । अनुच्येत्यंनु-उच्यं । याज्यंया जुहोति । जुहोति सदेवब्बायं । सदेवब्बाय यत् । सदेवब्बायेतिं सदेव-ब्बायं । यद्धुते । हुत आंदध्यात् । आदध्याद्रुद्रं । आदध्यादित्याँ-दध्यात् । रुद्रं गृहान् । गृहानन्वारोंहयेत् । अन्वारोंहयेद्यत् । अन्वारोंहयेदित्यंनु-आरोंहयेत् । यदंवक्षाणांनि । अवक्षाणान्यसंप्रक्षाप्य ।

अवक्षाणानीत्यव-क्षाणानि । असंप्रक्षाप्य प्रयायात् । असंप्रक्षाप्येत्यसँ-प्रक्षाप्य । प्रयायादथाँ । प्रयायादितिं प्र-यायात् । यथा यज्ञवेशसं । यज्ञवेशसं वाँ । यज्ञवेशसमितिं यज्ञ-वेशसं । वाऽऽदहनं । आदहनं वा । आदहनमित्याँ-दहनं । वा तादृक् । तादृगेव । एव तत् । तदयं । अयं तैं । ते योनिः । योनिर् ऋत्वियः । ऋत्विय इतिं । इत्यरण्योः । अरण्योस्समारोहयति । समारोहयत्येषः । समारोहयतीतिं सं-आरोहयति ()

काण्ड -3, प्रपाठक -4, अनुवाक -10, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -औपानुवाक्यम् (मन्त्र-ब्राह्मणात्मकम्),

। एष वै । वा अग्नेः । अग्नेर्योनिः । योनिः स्व । स्व एव । एवैनँ । एनं योनौं । योनौ समारोहयति । समारोहयत्यथाँ । समारोहयतीतिं सं-आरोहयति । अथो खलु । अथो इत्यथाँ । खल्वाहुः । आहुर्यत् । यदरण्योः । अरण्योस्समारूढः । समारूढो नश्येँत् । समारूढ इतिं सं-आरूढः । नश्येदुत् । उदस्य । अस्याग्निः । अग्निस्सीदेत् । सीदेत्पुनराधेयः । पुनराधेयस्स्यात् । पुनराधेय इतिं पुनः-आधेयः । स्यादितिं । इति या । यातैं । ते अग्ने । अग्ने यज्ञियाँ । यज्ञिया तनूः । तनूस्तयाँ । तया । एहिं । इह्या । आ रोह । रोहेतिं । इत्यात्मन् । आत्मन्त मारोहयते । समारोहयते यजमानः । समारोहयत इतिं सं-आरोहयते । यजमानो वै । वा अग्नेः । अग्नेर्योनिः । योनिस्स्वायाँ । स्वायामेव । एवैनँ । एनं योन्याँ । योन्याꣳ समारोहयते । समारोहयत इतिं सं-आरोहयते () ॥॥

काण्ड -3, प्रपाठक -4, अनुवाक -11, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

ब्रह्मंग्ने । अग्ने बृहत् । बृहद्वयः । वयो दधासि । दधासि देव । देव दाशुषैँ । दाशुष इतिं दाशुषैँ ॥ कविर्गृहपतिः । गृहपतिर्युवाँ । गृहपतिरितिं गृह-पतिः । युवेति युवाँ ॥ हव्यवाडग्निः । हव्यवाडितिं हव्य-वाट् । अग्निरजरः । अजरः पिता । पिता नः । नोविभुः । विभुर्विभावाँ । विभुरितिं वि-भुः । विभावा सुदृशीकः । विभावेतिं वि-भावाँ । सुदृशीको

अ॒स्मे । सु॒दृशी॑क॒ इति॑ सु-दृशी॑कः । अ॒स्मे इत्य॒स्मे । सु॒गा॒र्ह॒प॒त्यास्स॑म् । सु॒गा॒र्ह॒प॒त्या इति॑ सु-गा॒र्ह॒प॒त्याः । समिषः॑ । इषो॑ दिदीहि । दि॒दी॒ह्य॒स्मद्रिय॑क् । अ॒स्मद्रि॒यक्सं । अ॒स्मद्रि॒यगित्य॑स्म- द्रि॒यक् । सं मि॑मीहि । मि॒मी॒हि॒ श्रवा॑ꣳसि । श्रवा॑ꣳसीति॒ श्रवा॑ꣳसि ॥ ब्रह्मं च॑ । च॒ सो॒म॒ । सो॒म॒ नः॒ । नो॒ वशः॑ । वशो॑ जीवातु॑ । जी॒वा॒तु॒ न । न म॑रामहे । म॒रा॒म॒ह॒ इति॑ मरामहे । प्रि॒यस्तौ॑त्रो॒ वन॒स्पतिः॑ । प्रि॒यस्तौ॑त्र॒ इति॑ प्रि॒य-स्तो॒त्रः॒ । वन॒स्पति॒रिति॒ वन॒स्पतिः॑ ॥ ब्रह्मा दे॒वाना॑म् । दे॒वाना॑म् पद॒वीः॒ । प॒द॒वीः॒ क॑वी॒नाम् । प॒द॒वीरिति॑ पद-वीः॒ । क॒वी॒नामृषिः॑ । ऋषि॒र्विप्रा॑णाम् । विप्रा॑णं महि॒षः । म॒हि॒षो मृ॒गाणा॑म् । मृ॒गाणा॒मिति॑ मृ॒गाणा॑म् ॥ श्ये॒नो गृध्रा॑णाम् । गृध्रा॑णाꣳ स्वधिं॒तिः । स्वधिं॒ति॒ वन॑नाम् । स्वधिं॒ति॒रिति॒ स्व-दि॒तिः॒ । वन॑नाꣳ सोमः॑ । सोमः॑ प॒वित्र॑म् ()

काण्ड -3, प्रपाठक -4, अनुवाक -11, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। प॒वि॒त्र॒मति॑ । अत्ये॑ति । ए॒ति॒ रेभ॑न्न् । रेभ॒न्नि॒ति॒ रेभ॑न्न् ॥ आ वि॒श्वदे॑वं । वि॒श्वदे॑व॒ꣳ सत्प॑तिं । वि॒श्वदे॑व॒मिति॑ वि॒श्व-दे॒व॒ं । सत्प॑तिꣳ सू॒क्तैः॒ । सत्प॑ति॒मिति॒ सत्-प॒ति॒ं । सू॒क्तैरद्य । सू॒क्तैरिति॑ सु-उ॒क्तैः॒ । अ॒द्या वृ॑णीमहे । वृ॒णी॒म॒ह॒ इति॑ वृणीमहे ॥ स॒त्यस॑व॒ꣳ स॒वि॒तार॑म् । स॒त्यस॑व॒- मिति॑ स॒त्य-स॒व॒ं । स॒वि॒तार॒मिति॑ स॒वि॒तार॑म् ॥ आ स॒त्येन॑ । स॒त्येन॒ रज॑सा । रज॑सा॒ वर्त॑मानः । वर्त॑मानो नि॒वे॒शय॑न्न् । नि॒वे॒शय॑न्नमृत॑म् । नि॒वे॒शय॒न्निति॑ नि-वे॒शय॑न्न् । अ॒मृत॑ं मर्त्य॑म् । मर्त्य॑ं च । चे॒ति॑ च ॥ हि॒र॒ण्ययेन॑ सवि॒ता । स॒वि॒ता रथे॑न । रथे॑ना । आ दे॒वः । दे॒वो या॑ति । या॒ति॒ भुव॑ना । भुव॑ना वि॒पश्य॑न्न् । वि॒पश्य॒न्निति॑ वि-पश्य॑न्न् ॥ यथा॑ नः । नो॒ अदि॑तिः । अदि॑तिः कर॑त् । कर॒त्पश्चै॑ । पश्चे॑ नृ॒भ्यः॑ । नृ॒भ्यो॒ यथा॑म् । नृ॒भ्य॒ इति॑ नृ-भ्यः॒ । यथा॒ गवे॑ । गव॒ इति॒ गवे॑ ॥ यथा॑ तो॒काय॑ । तो॒काय॑ रु॒द्रिय॑म् । रु॒द्रिय॒मिति॑ रु॒द्रिय॑म् ॥ मा नः॑ । नस्तो॒के । तो॒के तन॑ये । तन॑ये मा । मा नः॑ । न आयु॑षि । आयु॑षि मा । मा नः॑ । नो॒ गोषु॑ । गोषु॒ मा । मा नः॑ ()

काण्ड -3, प्रपाठक -4, अनुवाक -11, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

। नो॑ अश्वे॑षु । अश्वे॑षु रीरिषः । रीरि॑ष इति॑ रीरिषः ॥ वी॒रान्मा । मा नः॑ । नो॑ रुद्र । रु॒द्र॒ भा॒मि॒तः । भा॒मि॒तो व॑धीः । व॒धीर् ह॒विष्म॑न्तः । ह॒विष्म॑न्तो नम॑सा । नम॑सा विधेम । वि॒धे॒म॒ ते॒ । त॒ इति॑ ते ॥ उ॒दप्रु॑तो न । उ॒दप्रु॑त इत्यु॒द-प्रु॑तः । न वयः॑ । वयो॑ रक्ष॑माणाः । रक्ष॑माणा॒ वाव॑दतः । वाव॑दतो अभि॑यस्य । अभि॑यस्येव । इ॒व॒ घोषा॑ः । घोषा॒ इति॒ घोषा॑ः ॥ गि॒रि॒भ्रजो॒ न । गि॒रि॒भ्र॒ज॒ इति॑ गिरि-भ्रजः॑ । नोर्मयः॑ । ऊ॒र्मयो॒ मद॑न्तः । मद॑न्तो बृह॒स्पति॑ं । बृ॒ह॒स्पति॑मभि । अ॒भ्य॑र्काः । अ॒र्का अ॑नावन्न् । अ॒ना॒व॒न्नि॒त्य॑नावन् ॥ ह॒꣡सै॑रिव । इ॒व॒ सखि॑भिः । सखि॑भि॒र्वाव॑दद्भिः । सखि॑भि॒रिति॒ सखि॑-भिः । वाव॑दद्भिरश्म॒न्मया॑नि । वाव॑दद्भि॒रिति॒ वाव॑दत्-भिः । अ॒श्म॒न्मया॑नि नह॑ना । अ॒श्म॒न्मया॒नीत्य॑श्मन्न्-मया॑नि । नह॑ना व्यस्यन्न् । व्यस्य॒न्निति॑ वि-अस्यन्न् ॥ बृह॒स्पति॑रभि॒कनि॑क्रदत् । अ॒भि॒कनि॑क्रद॒दित्य॑भि-कनि॑क्रदत् । गा उ॒त । उ॒त प्र । प्रास्तौ॑त् । अ॒स्तौ॒दुत् । उच्च॑ । च॒ विद्वान् । विद्वा॑ꣳ अगायत् । अ॒गा॒य॒दित्य॑गायत् ॥ एन्द्र॑ । इ॒न्द्र॒सा॒नसि॑ं । सा॒न॒सि॑ꣳ र॒यिं । र॒यि॑ꣳ सजित्वा॑नं ()

काण्ड -3, प्रपाठक -4, अनुवाक -11, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -याज्याः,

